# श्री सुरसरस्वती सभा शृङ्गेरि

## तृतीया परीक्षा

Aug - 2011 (1)

### प्रथमपत्रिका

दिनाङ्कः - २८-८-२०११ अङ्काः-१००

पूर्वाह्ले - १०-०० तः १-०० पर्यन्तम् समयः-३-०० होराः

**1 एकवाक्येन संस्कृतभाषया उत्तरत । (अष्टानामेव)** 8×1=8

१. चित्रग्रीवः कः ?

२. मल्लस्य नाम किम् ?

३. केन समस्या पूरिता ?

४. भूतानां प्रलयोदयौ कौ ?

५. धर्मव्याधः कुत्र न्यवसत् ?

६. कृषिं कुर्वता ब्राह्मणेन किं न लब्धम् ?

७. कालटिग्रामः कुत्र अस्ति ?

८. वृक्षस्योपरि का स्थिता ?

९. द्रोणस्य प्रसिद्धः शिष्यः कः ?

१०. अमरशक्तेः कति पुत्राः ?

**2 वक्यद्वयेन संस्कृतभाषया उत्तरत । (पञ्चानामेव)** 5×2=10

१. गणेशं के कदा नमस्कुर्वन्ति ?

२. शङ्कराचार्यस्य प्रसिद्धाः शिष्याः के ?

३. गोप्यानि कानि ?

४. भोजः सर्वान् कवीन् आहूय किम् अवदत् ?

५. कौशिकः पक्षिणं कुतः क्रूरया दृष्ट्या अपश्यत् ?

६. मल्लः परिकरं बध्वा राजानं किम् उवाच ?

**3 संस्कृतभाषया पञ्चषैः वाक्यैः उत्तरत । (त्रयाणामेव)** 3×3=9

१. विष्णुशर्मणः प्रतिज्ञा का ?



पश्चादनुवर्तते

२. गृहिणी द्विजं किम् अवदत् ?
३. विष्णोः आकारं वर्णयत ।
४. हनूमान् सीतां कथं आश्वासयामास ?

**4 मातृभाषया उत्तरत । (त्रयाणामेव)** 3×4=12

१ केषां मतिः क्षीयते ? विवृणुत ।
२. 'पतिव्रतायाः माहात्म्यं' पाठानुसारं विशदयत ।
३. कृतमुपकारं के विस्मरन्ति ? किमर्थम् ?
४. भोजराजस्य समस्या केन पूरिता ? कथम् ?

**5 स्वेष्टभाषया सन्दर्भं सूचयत । (चतुर्णामेव)** 4×3=12

१. कुतो विद्यार्थिनः सुखम् ?
२. कथमिमे गिरिमुद्धर्तुं शक्नुयुः ?
३. सर्पेण युक्तमेव कृतम् ।
४. गलं भित्वा अश्नाम ।
५. शयीमहि महीपृष्ठे ।

**6 द्वयोः अन्वयानुसारं अर्थं स्वेष्टभाषया लिखत ।** 2×2=4

१. एकमेवाक्षरं यस्तु गुरुः शिष्यं प्रबोधयेत् ।
पृथिव्यां नास्ति तद्द्रव्यं यद्दत्वा चानृणी भवेत् ।।

२. यथा कन्दुकपातोनोत्पतत्यार्यः पतन्नपि ।
तथा त्वनार्यः पतति मृत्पिण्डपतनं यथा ।।

३. पादपं कञ्चिदारुह्य तत्पलाशैः सुसंवृतः ।
आस्ते स्म मारुतिस्तत्र सीतेयमिति तर्कयन् ।।

**7 श्लोकद्वयं पूरयत ।** 2×2=4

१. जयन्ति ....................................... भयम् ।।
२. निन्दन्तु ....................................... न धीराः ।।
३. दोर्भियुक्ता ...................................... सुप्रसन्ना ।।

**8 भाषान्तरं कुरुत ।**

तस्मिन् एव समये चित्रग्रीवनामा कपोतराजः सपरिवारः वियति विसर्पन् तान् तण्डुलकणान् अवलोकयामास। ततः सः चित्रग्रीवः तण्डुलकणलुब्धान् कपोतान् प्रत्याह – ''कुतोऽत्र निर्जने वने तण्डुलकणानां सम्भवः? भद्रमिदं न पश्यामि। सम्यक् निरूप्यतां तावत्। सर्वथा अविचार्य कर्म न कर्तव्यम् इति।

**9 रिक्तस्थानं पूरयत । (त्रयाणामेव)** 3×1=3

१. आपत्काले .................. वचनं ग्राह्यम् ।

२. न जाने किं ..................... भविष्यति ।

३. अचक्षुषां चक्षुः .................. ।

४. कस्मिंश्चित् अधिष्ठाने हरदत्तो नाम ..................... आसीत् ।

**10 समानार्थकपदं लिखत । (त्रयाणामेव)** 3×1=3

१. सलिलम् २. वायसः ३. शुश्रूषा ४. भुजङ्गमः

**11 विरुद्धार्थकपदं लिखत । (त्रयाणामेव)** 3×1=3

१. उपक्रमः २. धीरः ३. प्रकाशः ४. भद्रम्

**12 वाक्यदोषं परिहरत । (त्रयाणामेव)** 3×1=3

१. रामः फलं खादन्ति ।

२. मम सह सः क्रीडति ।

३. भवान् पठ ।

४. गणेशं नमः ।

**13 वाक्ये योजयत । (त्रयाणामेव)** 3×1=3

१. प्राक् २. तस्मै ३. मम ४. साधयामि



पश्चादनुवर्तते

**14** **क्रियापदं पुरुषत्रये लिखत । (एकमेव)** 3x1=3

१. क्षीयते २. कारयामास

**15** **सन्धिं विभज्य नाम लिखत ।** 3x1=3

१. वागीशः २. उपविशत्वार्यः ३. हरिरस्ति

**16** **लोकोक्तिं एकां पूरयत्वा अर्थं विवृणुत ।** 1x4=4

१. याञ्छा .............................. ।

२. प्रक्षालनाद्धि .......................... ।

**17** **द्वयोः प्रयोगं परिवर्तयत ।** 3

१. भवान् गृहे भवति ।

२. तेन पूजा न कृता ।

३. नाहं विद्याविक्रयं करोमि ।

**18** **व्याकरण विशेषं सूचयत। (एकस्य)** 1x2=2

१. व्याघ्रात् भयम् २. गुरवे नमः

**19** **समूहेतरपदं लिखत ।** 3x1=3

१. ददाति, एधते, जयति, बभूव

२. करः, खरः, शिरः, कण्ठः

३. नृपतिः, राजा, भूपालः, मृगाधिपः

**20** **कर्तृ-कर्म-क्रियापदं च लिखत ।** 3x1=3

१. कालिदासः राजानं व्यजिज्ञपत् ।

२. योगी कश्चित् उज्जयिनीं जगाम ।

३. याचकः भैक्ष्याय ग्रामं गतवान् ।

* * * * *

# श्री सुरसरस्वती सभा शृङ्गेरि

## तृतीया परीक्षा

## द्वितीयपत्रिका

Aug – 2011 (2)

दिनाङ्कः – २८-८-२०११ | अङ्काः–५०
अपराह्ने – १-३० तः ३-०० पर्यन्तम् | समयः–सार्धैकहोरा

**1 अ) दशभिः वाक्यैः संस्कृतभाषया प्रबन्धमेकं लिखत ।** 5

१. सुभाषितम् २. दीपावली ३. धेनुः

**आ) संस्कृतभाषया पत्रमेकं लिखत ।** 5

१. अनारोग्यकारणतः विरामं प्रार्थयन् कक्षाध्यापकाय पत्रं लिखत ।
२. पित्रा पुत्रं प्रति लिखितं पत्रम् ।

**2 द्वयोः लक्षणं सोदाहरणं आङ्ग्लभाषया कर्णाटकभाषया वा लिखत।** 6

१. अव्ययम् २. उपसर्गः ३. कर्तरीप्रयोगः

**3 त्रिषु पुरुषवचनेषु लिखत । (द्वावेव)** 6

१. अपिबत् २. गमिष्यति ३. मोदताम्

**4 एकस्य सुबन्तस्य सर्व-विभक्तिरूपाणि सर्वेषु वचनेषु लिखत ।** 4

१. राजन् २. युष्मद् ३. तद् (पुल्लिङ्गः)

**5 वाक्यदोषान् परिहरत ।** 4

१. प्रजाभिः स्वस्ति । २. गुरोः अभितः छात्राः उपविशन्ति ।
३. गङ्गा हिमालयेन प्रवहति । ४. काया-वाचा-मनसा सत्यम् एव वद ।

**6 प्रयोगं परिवर्तयत ।** 4

१. माता शिशुं लालयति । २. सीता पठति ।
३. अहं चलच्चित्रं अपश्यम् । ४. त्वं गृहं गच्छ ।

**7 निर्दिष्टं पदं भित्वा प्रत्ययं सूचयत ।** 4

१. उपदिश्य २. भक्षयितुम् ३. पश्यन् ४. लिखितवती



पश्चादनुवर्तते

**8** **वाक्यमेकं स्वेष्टभाषया विवृणुत ।** 2

१. सहसा विदधीत न क्रियाम् ।

२. नास्ति मातृसमो बन्धुः ।

**9** **मातृभाषया अनुवादं कुरुत :-** 5

१. अहं पित्रा सह ग्रामं गच्छामि ।

२. कपोताः धान्यानि भक्षयितुं आगच्छन्ति ।

३. काशीनगरे कश्चन विद्वान् अभवत् ।

४. त्वं शुचीनि वस्त्राणि धरेः ।

५. अस्मिन् दर्पणे तव मुखम् ईक्षस्व ।

**10** **संस्कृते अनुवदत ।** 5

१. ನಕ್ಷತ್ರಗಳು ಆಕಾಶದಲ್ಲಿ ಪ್ರಕಾಶಿಸುತ್ತವೆ.
Stars shine in the sky.

२. ತಾಯಿಯು ಮಿಠಾಯಿಗಳನ್ನು ಕೊಟ್ಟಳು.
Mother gave sweets.

३. ನೀವು ಶ್ರದ್ಧೆಯಿಂದ ಓದಿರಿ.
You study with faith.

४. ದೇಶದ್ರೋಹಿಗಳು ನಾಶವಾಗಲಿ.
Anti-nationals should get destroyed.

५. ಅವನು ಕುದುರೆಯಿಂದ ಕೆಳಗೆ ಬಿದ್ದನು.
He fell down from the horse.

* * * * *